जीवहरणं यदुलूकिकायास्तैमासिकस्य च पदा शकटोऽपवृत्तः” भाग० २।७।२८।

**तोक्म** पु० तक-मन् पृषो० अत ओत्त्वम्। १हरिद्वर्णे अपक्वयवे अमरः। २हरिद्वर्णे हेमच०। ३कर्णमले न० हेम०। ४मेघे पु० अजयपालः। ५नवप्ररूढ़े यवे यवाङ्कुरे न०। “प्रायणीयस्य तोक्मानि” यजु० १९।१३। “तोक्मानि नवप्ररूढ़यवाः” वेददी०। “पत्रपुष्पफलच्छायामूलवल्कलदारुभिः। गन्धनिर्यासभस्मास्थितोक्मैः कामान् वितन्वते” भाग० १०।२२।२५ “तोक्माः पल्लवाद्यङ्कुराः” श्रीधरः तेन ६तदर्थेऽपि च।

**तोक्मन्** न० तक-मनिन् पृषो० अत ओत्त्वम्। नवविरूढ़यवे २अपत्ये न० निघण्टुः। “भेषजं तोक्मभिः” यजु० २१।३०। “तोक्मभिर्लाजैर्महःस्वन्तः” यजु० २१।४२।

**तोटक** न० द्वादशाक्षरपादके छन्दोभेदे। “इह तोटकमम्बुधिसैः प्रथितम्” वृ० र०। [ऋदित्। णिच् अतुतोडत् त।

**तोड** अनादरे भ्वा० पर० सक० सेट्। तोडति अतोडीत्।

**तोड़ल** न० तन्त्रभेदे।

**तोतस्** अव्य० तु-बा० तसि। १कलत्रे २त्वयीत्यर्थे च। “मा वयं रायस्पोषेण वियौष्म तोतो रायः” यजु० ४।२२। तोतः शब्दः कलत्रवाची अव्ययम्। तोतः कलत्रे रायो धनानि पशवो वा मदनुक्रमेण तिष्ठन्तु। यद्वाऽव्ययानामनेकार्थत्वात्तोतः शब्दो युष्मत्पर्य्यायः। तोतः त्वयि रायः सन्तु” वेददी०।

**तोड़न** न० तुड-भावे ल्युट्। १भेदने २दारणे ३हिंसने च।

**तोड़ी(री)** स्त्री तुड़-अच् गौरा० ङीष् वा डस्य रः। स्वनामख्याते तैलसाधने धान्यभेदे। [अमरः।

**तोत्त्र** न० तुद्यतेऽनेन तुद-करणे ष्ट्रन्। गवादिताड़ने दण्डे

**तोद** पु० तुद-भावे घञ्। व्यथायां रत्नमाला। “हीनदग्धे तोदकण्डूजाड्यानि व्याधिवृद्धिश्च” सुश्रु०। “दंशे तोदकण्डूप्रादुर्भावैर्जानीयात्” सुश्रु०। कर्त्तरि अच्। २व्यथके त्रि०। “तोदो वातस्य हर्य्योरीशानः” ऋ० ४।१६।११। “तोदस्तोदकः” भा०।

**तोदन** न० तुद्यतेऽनेन करणे ल्युट्। १तुण्डे मुखे अमरः। भावे ल्युट्। २व्यथायाम् मेदि०। कर्त्तरि ल्यु। ३व्यथके त्रि०। “कषायं मधुरं रूक्षं तोदनं कफवातजित्” सुश्रु०। ४वृक्षभेदे पु०। “क्षीरवृक्षफलजाम्बवराजादनतोदनतिन्दुकबकुलधन्वनाश्मन्तकाश्वकर्णफलगुपरूषकगाङ्गेरुकीपुष्करवर्त्ति बिल्वबिम्बीप्रभृतीनि। फलान्येतानि शीतानि कफपित्तहराणि च। संग्राहकाणि रूक्षाणि कषायमधुराणि च” सुश्रु०।

**तोदपर्णी** स्त्री तोदं तोदकं पर्णमस्याः गौरा० ङीष्। कुत्सिते धान्यभेदे।

“कोरदूषकश्यामाकनीवारशान्तनुतुवरकोद्दालकप्रियङ्गुमधूलिकानान्दीमुखकुरुविन्दगवेधुकवरुकतोदपर्णीमुकुन्दकवेणुयवप्रभृतयः कुधान्यविशेषाः” सुश्रु०।

**तोमर** पुंन० तु-विच् तौ गतौ म्रियतेऽनेन मृ-करणे अप्। १हस्तक्षेप्ये शल्याग्रे दण्डाकारेऽस्त्रभेदे (रायबाँश) अमरः। तोमरलक्षणं हेमा० प० लक्षणसमुच्चये उक्तं यथा। औशनसधनुर्वेदे। “शुक्रो भगवानुवाच जमदग्निं प्रति वत्स! निबोध यथाप्रश्नमुच्यमानम् तत्र दण्डान्वितं सर्वलौहं वेति तोमरं द्विविधं भवति। तच्च तोमरं सदण्डं लघ्वायतं भवेत् तोमरं सर्वायसं तत्कार्य्ये प्रयोजयेत्। तच्च निकृष्टमध्यमोत्तमं भूयस्त्रिविधं प्रमाणतो भवति तत्र चतुर्हस्तप्रमाणं निकृष्टं सार्द्धचतुर्हस्तं मध्यमं पञ्चहस्तप्रमाणं तूत्तमं भवति। तथा कलनायां चाद्यं द्वितीयं तृतीयं चेति त्रिधा द्व्यङ्गुलमध्ये द्व्यङ्गुलकलितमेकं स्यान्मध्यात्पूर्वं त्र्यङ्गुलकलितं द्वितीयं स्यात्। मध्यात्पूर्वं षडङ्गुलकलितस्थानकलनया तृतीयं स्यात्। सार्द्धमेकं निकृष्टं, त्रयोमध्यमं षडुत्तमं कलनायास्तथा तोमरास्त्रस्य परिणाहः परः षडङ्गुलो भवति सार्द्धपञ्चाङ्गुलो मध्यमः पञ्चाङ्गुलः कनिष्ठ इति। त्रयाणां देशानां त्रयः छन्दाः। छादनात्तथा आवन्त्यो मागधो दाक्षिणात्यश्चेति। तत्रावन्त्यतोमरं तक्षणसंस्थानं भवति मागधं तोमरं योनिसंस्थानं भवति दाक्षिणात्यं तोमरं वृत्तं भवति। तेषां मुखानि तद्देशाच्छन्दतः इति इत्यादि। २नवाक्षरपादके छन्दोभेदे “प्रथमं सकं विनिधाय जगणद्वयञ्च निधाय। कुरु तोमरं सुखकारि फणिराजवक्त्रविहारि” तल्लक्षणम्। [मरास्त्रग्राहिणि।

**तोमरग्रह** पु० तोमरं गृह्णाति ग्रह-अच् न अण्। तो-

**तोमरधर** पु० तोमरमस्त्रं धरति धृ-अच्। वह्नौ शब्दार्थक०

**तोमरिका** स्त्री तोमर+संज्ञायां कन्। आढक्याम् शब्दर०

**तोय** न० सौ० तु-विच् तवे पूर्त्त्यै याति या क। १जले २पूर्वाषाढ़ानक्षत्रे च। “उद्धृत्य मेघैस्तत एव तोयम्” माघः। “स्वत्तोयैः शुध्यते शोध्यं नदीवेगेन शुध्यति” मनुः। पूर्वाषाढ़ानक्षत्रस्य जलदैवतत्वात् तथात्वम्। ३लग्नावधिचतुर्थस्थाने च ज्यो० त०। तत्र जलस्य चिन्तनीयत्वात् तथात्वम्।